# चतुरङ्गे तुरग बन्धः

तरसाऽता दयाराऽख रामामोद्य दरापहा ।

क्षणमा भाक्षिहाऽलेपा रक्षतु प्राज्ञ्यति प्रति ॥ 103 ॥

अयं चतुरङ्ग बन्धे पङ्क्तिशोलेख्य श्लोकः । तुरगपदोधृत श्लोकस्तु ''तमोदपतिहा प्राण सादरा पातिभाऽक्षरा । मारमाता क्षिप्रहाया लेखराज्ञ्यद्य रक्षतु'' ।

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| त 1 | र 30 | सा 9 | ता 20 | द 3 | या 24 | रा 11 | ख 26 |
| रा 16 | मा 19 | मो 2 | द्य 29 | द 10 | रा 27 | प 4 | हा 23 |
| क्ष 31 | ण 8 | मा 17 | भा 14 | क्षि 21 | हा 6 | ले 25 | पा 12 |
| र 18 | क्ष 15 | तु 32 | प्रा 7 | ज्ञ्य 28 | ति 13 | प्र 22 | ति 5 |

पूर्वं द्वात्रिंशत् कोष्टक्रमेण लिखितः । चतुरङ्गरीत्या चतुष्षष्टि कोष्टक्रमेण लेखने तुरगपदक्रमेण श्लोकोद्धारे द्वात्रिंशत् कोष्ठाः पर्याप्ताः । शेषाणां किञ्चित् छिन्नं निवेश्य दर्शने तेपि तुरगपदो धृता भवन्ति । पूर्वार्धः पूर्वभागे उक्तं । * * * * * * तरभागे पठनियुं । तरसेति । चतुरङ्ग बन्धे पङ्क्तशो लेख्य प्रथम श्लोकार्थः अता-कोपशून्या । दयारा-रा आदाने, दयवतीत्यर्थः अखरो-अतीक्ष्णा । अमोद्यदुरापहा-अमया-अविद्यया उद्यन् यं अरः - यानाभावः तमपहन्तीति तथा भूता । क्षणमा-उत्सवप्रिया । क्षणे-उत्सवे मा-धीः यस्याः । भाक्षिहा-भयादीप्त्या सर्वेषामक्षिणी हन्तीति तथोक्ता । अलेपा-गर्वशून्या । प्राज्ञी-सर्वज्ञा मा-लक्ष्मीः । तरसा-शीघ्रं । अति अत्यन्तं, प्रति-मुहुर्मुहुः रक्षतु । अत्यन्तं रक्षणं नाम सर्वविषय रक्षणं ।

तुरगपदोधृत श्लोकार्थस्तु (एवम्) तमोदपतीति । तमोदपतिहा - तमोदाः शोकप्रदाः ये असुरादयः तेषां पतीन् - श्रेष्ठान् हन्तीति तथोक्ता । प्राणसादरा प्राणेषु आत्मसु आदरवती । पा-प्रसन्ना अतिभा-निरतिशय तेजस्विनी । अक्षरा-नित्या । क्षिप्रहाया-क्षिप्रं शीघ्रं हे-हरौ, अयः शुभावहविधिः यस्यास्सा । लेखराज्ञी-देव चक्रवर्ती । महिषी। भगवतो देवराजत्वात् तत्पत्न्याः देवराज्ञीत्वं । एवं भूता मारमाता-लक्ष्मीः अद्य रक्षतु । तमो

| | | | | | | | |
|---|---|---|---|---|---|---|---|
| त 1 | (1) र | सा 9 | (13) ता | द 3 | (3) या | रा 11 | (7) ख |
| रा 16 | (12) मा | मो 2 | (2) द्य | द 10 | (6) रा | प 4 | (4) हा |
| (16) क्ष | ण 8 | (10) मा | भा 14 | (14) क्षि | हा 6 | (8) ले | पा 12 |
| (11) र | क्ष 15 | (15) तु | प्रा 7 | (9) ज्ञ्य | ति 13 | (5) प्र | ति 5 |
| (17) त | र 30 | (29) सा | ता 20 | (19) द | या 24 | (23) रा | ख 26 |
| (32) रा | मा 17 | (18) मो | द्य 29 | (26) द | रा 27 | (20) प | हा 23 |
| क्ष 31 | (28) ण | मा 19 | (30) भा | क्षि 21 | (22) हा | ले 25 | (24) पा |
| र 18 | (31) क्ष | तु 32 | (27) प्रा | ज्ञ्य 28 | (25) ति | प्र 22 | (21) ति |

राहौ गुणे ध्वान्ते शोके । देहान्तरानिले प्राणे जीवा पर माति नोः । पस्त्रिष्वार्ते प्रसन्नेच । भश्शंकरे हरौ मूर्घ्नि । अयश्शुभावहो विधिः । त शब्दः पुंसि संभोगे विश्चये गोपपुच्छयोः । मास्त्री मानेमृतौ वेला मेधा श्री । रं क्लीबे रुधिरे मूर्घ्नि ध्यान व्योम । लेपो भाजन गर्वयोः । अति स्यादधिकार्योक्तौ प्रशंसायामतिक्रमे । प्रति - प्रतिनिधौ इत्तं भूतार्थानाभि मुखयोः । वीप्सायां लक्षणे भागे । इति सर्वत्र नानार्थ रत्नमाला ।

1 to 32 तमोदपतिहा प्राण सादरा पाति भाक्षरा ।
मारमाता क्षिप्रहाया लेखराज्ञ्यद्य रक्षतु ॥

(1) to (32) रद्ययाहाप्ररारवलेज्ञ्य मारमाताक्षितुक्ष ।
तमोदपति हारापातिद प्राणसाभाक्षरा ॥

# हल बन्धः

वासवानलपाशाद्याद्याशा पालनतस्तुत ।

तवाच्युत पदं वन्दे यजतां ममतां जय ॥ 104 ॥

वासवेति । वासवः अनिलः । पाशः आद्यः - मुख्यः यस्य सः पाशाद्यः वरुण इत्यर्थः । ततश्च इन्द्राग्नि वरुण प्रमुख दिक्पालैः नतस्तुत इत्यर्थः । यजतां त्वदाराधकानां ममतां -अहंकार ममकारादिकं, जय- नाशाय । एवं च त्वदाराधकस्य मम अहंकारादिकं च नाशयेति भावः ।




## हलबन्धस्यैव कोष्ट क्रमभेदः



# विणा बन्धः

पारावारक्षितिपतिभवा भव्य दिव्यस्वरा-स्वर्वामोर्वादि स्तुतपद पयोजातयुग्माखिलेड्या ।

राकाचन्द्र प्रतिमवदना स्मेर पाथोजहस्ता शक्ता शस्ता हरिपद्युगन्यस्त चित्ता रमाव्यात् ॥ 105 ॥

पारावारेति । स्पष्टोर्थः ।



# निश्रेणिका बन्धः

वन्दे दशास्यान्तकमंगदस्व -

श्रीराघवत्वादरमाशरघ्न ।

देवेन्दिरावन्दित शान्तचित्त

दमादरामन्द दयारयाद ॥ 106 ॥




वन्देति । अङ्गदस्व - अङ्गदस्य आत्मीय भगवतो भक्त-पराधीनत्वात्-अङ्गदस्य च तत् भक्तवरत्वात् तत् पराधीन इत्यर्थः । लक्ष्मण भरतादिष्वाङ्गदेपि स्वामिनो भ्रातृवात्सल्य इति भावः । अर-नाशरहित । याद-शोभाप्रद । अदरं - भयरहितं । यद्वा न विद्यते दरो यस्मात् आश्रितानामिति वा अदरः तं । अथवा वन्दे इति क्रिया विशेषणं । शिष्टं स्पष्टम् । रः पुमान् पावके कामे क्षये शोभालके इति नानार्थ रत्नमाला ।



# नव वर्षक जंबू द्वीप बन्धः

कंस प्रभङ्ग प्रद माधवाव कंजस्फुरद्वक्त्र वसादरुक्ष ।

क्षपेश वक्त्र प्रभधर्म भाव वरप्रद प्रस्पुरदंबुजाक्ष ।। 108 ।।

व्या-वसां अदन्तीति-वसादाः -राक्षसाः तेषां रुक्ष भयंकरेति भावः । कञ्जेत्यादिना पद्मतुल्यत्वं । क्षपेशेत्यादिवा चन्द्र तुल्यत्वं मुखस्योक्तं । उभय सांयासंभवात् । धर्म भाव-धर्मेषु आचार मूलेषु सत्कर्मसुभावः यस्य । आचार प्रभवो धर्मो धर्मस्य प्ररुरच्युत इति वाक्यमत्रानु-सन्धेयं ।

(रक्षस्त्वप्रेम्ण्यचिक्कणे इत्यमरः PKS)






Transliterated by Sri. P. K. Srinivasan; Publisher: Prof. K. Sampath

# दीपस्तंभ बन्धः

देवदेव ममादम्भ दयादरदराहर ।

हताराते हरेविष्णो हरादरदमामव ॥ 109 ॥

देवेति । अदंभदय - निर्व्याजकृप । अदरद-आश्रितानां अभयप्रद । राहर-रः-अग्निः अः ब्रह्मा हः रुद्रः एते रे - कुक्षौ यस्य तथा भूतः सर्वभूतोपलक्षणं उक्त देवतात्रयमिति बोध्यं । सर्व चराचरकारण भूतेति भावः । हरादरद-रुद्रत रुद्रेत्यर्थः । मम देवदेवेति अन्वयः । शिष्टं स्पष्टं । रः पुमान् पावके कामे रं क्लीबे रुधिरे मूर्ध्नि याने व्योमाण्ड कुक्षिषु । हश्शंकरेहरौ । अकारो ब्रह्मविष्ण्वीश । इति नानार्थ रत्नमाला ।



## वृक्ष बन्धः

रचिता सदमोदासा दामोदरमता सदा ।

सतामधिकदा पद्मा पदाकमलभाऽसहा ।

सभालसदिरामाव्यात् मारादिजननी शुभा ॥ 110 ॥

रचितेति । अमोदः - दुःखं । असतां अमोदः रचितः यया सा । पदेत्यादि-कमलादायधिक श्रीक पदेति अर्थः । समायां परिषदि लसन्ती इरा-वाक् यस्यास्सा । तद्विषयक बागेव सर्व सभास्वपि प्रकाशत इति भावः । शिष्टं स्पष्टम् ।



# घटिका यन्त्र बन्धः

सकल सुरवर श्रीवन्द्य वन्दारु चारुस्थिरतर फलदालस्यन्दमेदं रमेश ।

सरुडसुरविनाशे साश राम क्षमध्वं मम महदघदण्डं रक्ष रक्ष प्रजेश ॥ 111 ॥

सकलेति । सकलसुरवरैः श्रिया च वन्द्य । वन्दारुस्थैर्थः सेवेकेभ्यः चारूणि आनन्दप्रदत्वेन रम्याणि-स्थिरतराणि शाश्वतानि च फलानि ददातीति - वन्दारुचारुस्थितर - फलद । सुविना शेसाश-सकोपासुर विनाशाभिलाषेत्यर्थः । रमेश - श्रियः पते । अत एव प्रजेश-सर्वेश्वर राम मम आलस्यं - जाडयं दम-नाशय । मदज्ञानं निवर्तय इत्यर्थः । ममहत् अघदण्डं दण्डवत् अनुवर्तमानं अघं क्षमध्वं । रक्ष रक्ष । अविद्यापापरूपा - निष्टानिवृत्तिं कृत्वा इष्टाञ्च दद ।




॥ बन्धं १०० सम्पूर्णम् ॥

प्राचीन लक्ष्यात् प्रायेण युक्त्या चोहेन दुष्करा: ।
बन्धा बहुविधाश्चित्रा रसिकानन्ददा: कृता: ॥
पञ्च श्रीश सदायुधान्यथ रक्षाङ्गानां क्रमास्सप्तवै
चत्वारो मनव: भोगोपकरणान्येकदशोक्तान्यथ ।
सेनाङ्गानि षडायुधानि दश तत् गोमूत्रिका सप्तकं
सर्पास्सप्त सटा सरोजगणना सङ्कीर्ण संख्या तरि: ॥
इत्थं चित्रमये काव्ये शत बन्ध परिष्कृत: ।
द्वितिय्योऽपि परिच्छेद: समाप्तिमगमत् क्रमात् ॥

**इति श्रीरामभद्रविरचिते चित्रकाव्ये द्वितिय्य परिच्छेद: समाप्त: ।**

**इतिश्रीशैलकुलतिलकेन श्रीनिवासयतीन्द्र महादेशिक कटाक्ष लब्ध सत्ताकेन श्रीरामभद्र बुधवरेण विरचितं चित्रकाव्यं समाप्तम् ।**

(सम्पादकस्य टिप्पणि । पञ्चेति-अत्र कवि: स्वविरचित शत बन्धानां पृथक् रूपेण संख्या विवरणं करोति) ।

| | | | |
|---|---|---|---|
| तच्च एवं - | नारायणस्य पञ्चायुघबन्धा: | - | ५ |
| | चक्रबन्धा: | - | ७ |
| | मन्त्र बन्धा: | - | ४ |
| | भोगोपकरण बन्धा: | - | ११ |
| कटपयादि सूत्रानुसारेण | सेनाङ्ग बन्धा: | - | ६ |
| सटा - १७ | आयुध बन्धा : | - | १० |
| तरि: - २६ | गोमूत्रिका बन्धा : | - | ७ |
| | सर्प बन्धा: | - | ७ |
| | पद्म बन्धा: | - | १७ |
| | सङ्कीर्ण बन्धा: | - | २६ |
| | अहत्य बन्धा: | - | १०० |

इति बोध्यम् ।